# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय २६

स तु तत्र दशग्रीवः सह सैन्येन वीर्यवान् ।
अस्तं प्राप्ते दिनकरे निवासं समरोचयत् ॥१॥

उदिते विमले चन्द्रे तुल्यपर्वतवर्चसि ।
स ददर्श गुणांस्तत्र चन्द्रपादोपशोभितान् ॥२॥

कर्णिकारवनैर्दिव्यैः कदम्बगहनैस्तथा ।
पद्मिनीभिश्च फुल्लाभिर्मन्दाकिन्या जलैरपि ॥३॥

घण्टानामिव संनादः शुश्रुवे मधुरस्वनः ।
अप्सरोगणसङ्घनां गायतां धनदालये ॥४॥

पुष्पवर्षाणि मुञ्चन्तो नगाः पवनताडिताः ।
शैलं तं वासयन्तीव मधुमाधवगन्धिनः ॥५॥

मधुपुष्परजःपृक्तं गन्धमादाय पुष्कलम् ।
प्रववौ वर्धयन्कामं रावणस्य सुखोऽनिलः ॥६॥

गेयात्पुष्पसमृद्धया च शैत्याद्वायोर्गुणैर्गिरेः ।
प्रवृत्तायां रजन्यां च चन्द्रस्योदयनेन च ॥७॥

रावणः सुमहावीर्यः कामबाणवशं गतः ।
विनिश्वस्य निविश्वस्य शशिनं समवैक्षत ॥८॥

एतस्मिन्नन्तरे तत्र दिव्यपुष्पविभूषिता ।
सर्वाप्सरोवरा रम्भा पूर्णचन्द्रनिभानना ॥९॥

कृतैर्विशेषकैरार्द्रैः षडर्तुकुसुमोत्सवैः ।
नीलं सतोयमेघाभं वस्त्रं समवगुण्ठिता ॥१०॥

यस्य वक्त्रं शशिनिभं भ्रुवौ चापनिभे शुभे ।
ऊरू करिकराकारौ करौ पल्लवकोमलौ ।
सैन्यमध्येन गच्छन्ती रावणेनोपलक्षिता ॥११॥

तां समुत्थाय रक्षेन्द्रः कामबाणबलार्दितः ।
करे गृहीत्वा गच्छन्तीं स्मयमानोऽभ्यभाषत ॥१२॥

क्व गच्छसि वरारोहे कां सिद्धिं भजसे स्वयम् ।
कस्याभ्युदयकालोऽयं यस्त्वां समुपभोक्ष्यते ॥१३॥

तवाननरसस्याद्य पद्मोत्पलसुगन्धिनः ।
सुधामृतरसस्येव कोऽद्य तृप्तिं गमिष्यति ॥१४॥

स्वर्णकुम्भनिभौ पीनौ शुभौ भीरु निरन्तरौ ।
कस्योरस्थलसंस्पर्शं दास्यतस्ते कुचाविमौ ॥१५॥

सुवर्णचक्रप्रतिमं स्वर्णदामचितं पृथु ।
अध्यारोक्ष्यति कस्तेऽद्य स्वर्गं जघनरूपिणम् ॥१६॥

मद्विशिष्टः पुमान्कोऽन्यः शक्रो विष्णुरथाश्विनौ ।
मामतीत्य हि यस्य त्वं यासि भीरु न शोभनम् ॥१७॥

विश्रम त्वं पृथुश्रोणि शिलातलमिदं शुभम् ।
त्रैलोक्ये यः प्रभुश् चैव तुल्यो मम न विद्यते ॥१८॥

तदेष प्राञ्जलिः प्रह्वो याचते त्वां दशाननः ।
यः प्रभुश्चापि भर्ता च त्रैलोक्यस्य भजस्व माम् ॥१९॥

एवमुक्ताब्रवीद्रम्भा वेपमाना कृताञ्जलिः ।
प्रसीद नार्हसे वक्तुमीदृशं त्वं हि मे गुरुः ॥२०॥

अन्येभ्योऽपि त्वया रक्ष्या प्राप्नुयां धर्षणं यदि ।
धर्मतश्च स्नुषा तेऽहं तत्त्वमेतद्ब्रवीमि ते ॥२१॥

अब्रवीत्तां दशग्रीवश्चरणाधोमुखीं स्थिताम् ।
सुतस्य यदि मे भर्या ततस्त्वं मे स्नुषा भवेः ॥२२॥

बाढमित्येव सा रम्भा प्राह रावणमुत्तरम् ।
धर्मतस्ते सुतस्याहं भार्या राक्षसपुङ्गव ॥२३॥

पुत्रः प्रियतरः प्राणैर्भ्रातुर्वैश्रवणस्य ते ।
ख्यातो यस्त्रिषु लोकेषु नलकूवर इत्यसौ ॥२४॥

धर्मतो यो भवेद्विप्रः क्षत्रियो वीर्यतो भवेत् ।
क्रोधाद्यश्च भवेदग्निः क्षान्त्या च वसुधासमः ॥२५॥

तस्यास्मि कृतसङ्केता लोकपालसुतस्य वै ।

तमुद्दिश्य च मे सर्वं विभूषणमिदं कृतम् ॥ २६ ॥

यस्य तस्य हि नान्यस्य भावो मां प्रति तिष्ठति ।
तेन सत्येन मां राजन्मोक्तुमर्हस्यरिन्दम ॥ २७ ॥

स हि तिष्ठति धर्मात्मा साम्प्रतं मत्समुत्सुकः ।
तन्न विघ्नं सुतस्येह कर्तुमर्हसि मुञ्च माम् ॥ २८ ॥

सङ्गिराचरितं मार्गं गच्छ राक्षसपुङ्गव ।
माननीयो मया हि त्वं लालनीया तथास्मि ते ॥ २९ ॥

एवं ब्रुवाणं रम्भां तां धर्मार्थसहितं वचः ।
निर्भर्त्स्य राक्षसो मोहात्प्रतिगृह्य बलाद्बली ।
काममोहाभिसंरब्धो मैथुनायोपचक्रमे ॥ ३० ॥

सा विमुक्ता ततो रम्भा भ्रष्टमाल्यविभूषणा ।
गजेन्द्राक्रीडमथिता नदीवाकुलतां गता ॥ ३१ ॥

सा वेपमाना लज्जन्ती भीता करकृताञ्जलिः ।
नलकूबरमासाद्य पादयोर्निपपात ह ॥ ३२ ॥

तदवस्थां च तां दृष्ट्वा महात्मा नलकूबरः ।
अब्रवीत्किमिदं भद्रे पादयोः पतितासि मे ॥ ३३ ॥

सा तु निश्वसमाना च वेपमानाथ साञ्जलिः ।
तस्मै सर्वं यथातथ्यमाख्यातुमुपचक्रमे ॥ ३४ ॥

एष देव दशग्रीवः प्राप्तो गन्तुं त्रिविष्टपम् ।
तेन सैन्यसहायेन निशेह परिणाम्यते ॥ ३५ ॥

आयान्ती तेन दृष्टास्मि त्वत्सकशमरिन्दम ।
गृहीत्वा तेन पृष्टास्मि कस्य त्वमिति रक्षसा ॥ ३६ ॥

मया तु सर्वं यत्सत्यं तद्धि तस्मै निवेदितम् ।
काममोहाभिभूतात्मा नाश्रौषीत्तद्वचो मम ॥ ३७ ॥

याच्यमानो मया देव स्नुषा तेऽहमिति प्रभो ।
तत्सर्वं पृष्ठतः कृत्वा बलात्तेनास्मि धर्षिता ॥ ३८ ॥

एवं त्वमपराधं मे क्षन्तुमर्हसि मानद ।
न हि तुल्यं बलं सौम्य स्त्रियाश्च पुरुषस्य च ॥ ३९ ॥

एवं श्रुत्वा तु सङ्क्रुद्धस्तदा वैश्वरणात्मजः ।
धर्षणां तां परां श्रुत्वा ध्यानं सम्प्रविवेश ह ॥ ४० ॥

तस्य तत्कर्म विज्ञाय तदा वैश्रवणात्मजः ।
मुहूर्तादोषताम्राक्षस्तोयं जग्राह पाणिना ॥ ४१ ॥

गृहीत्वा सलिलं दिव्यमुपस्पृश्य यथाविधि ।
उत्ससर्ज तदा शापं राक्षसेन्द्राय दारुणम् ॥ ४२ ॥

अकामा तेन यस्मात्त्वं बलाद्भद्रे प्रधर्षिता ।
तस्मात्स युवतीमन्यां नाकामामुपयास्यति ॥ ४३ ॥

यदा त्वकामां कामार्तो धरयिष्यति योषितम् ।
मूर्धा तु सप्तधा तस्य शकलीभविता तदा ॥ ४४ ॥

तस्मिन्नुदाहृते शापे ज्वलिताग्निसमप्रभे ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता ॥ ४५ ॥

प्रजापतिमुखाश्चापि सर्वे देवाः प्रहर्षिताः ।
ज्ञात्वा लोकगतिं सर्वां तस्य मृत्युं च रक्षसः ॥ ४६ ॥

श्रुत्वा तु स दशग्रीवस्तं शापं रोमहर्षणम् ।
नारीषु मैथुनं भावं नाकामास्वभ्यरोचयत् ॥ ४७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com